## अध्याय : ८ chapter-8

नारद उवाच ।।[१]

नाडीजंघबकेनोक्तां वाचमाकर्ण्य भूपतिः ।।
मार्कंडेयेन संयुक्तो बभुवातीव दुःखित:।। १

तं निशाम्य मुनिर्भूपं दुःखितं साश्रुलोचनम् ।।
समानव्यसनः प्राह तदर्थं स पुनर्बकम् ।। २

विधायाशां महाभाग त्वदंतिकमुपागतौ ।।
आवां चिरायुर्ज्ञातांशाविन्द्रद्युम्नमिति द्विज ।। ३

निष्पन्नं नास्य तत्कार्यं प्राणानेषा मुमुक्षति ।।
वह्निप्रवेशन परं वैराग्यं समुपागतः ।। ४

तन्मामुपागतोऽहं च त्वां सिद्धं नास्य वांछितम् ।।
तदेनमनुयास्यामि मरणेन त्वया शपे ।। ५

आशां[२] कृत्वाभ्युपायातं निराशं नेक्षितुं क्षमाः ।।
भवंति साधवस्तस्माज्जीवितान्मरणं विरम् ।। ६

प्रार्थितं चामुना त्वदर्थं मया चास्मै प्रतिश्रुतम् ।।
त्वां मित्रं तत्परिज्ञाने धृत्वा त्वदि चिरायुषम् ।। ७

---

१ ब श्री नारद ।।
२ ब्रो आशां

असंपादयतो नार्थं प्रतिज्ञातं ममायुषा ।।
कलुषीणाधिनामाशापूरकेण[1] सखेधुना ।। ८

प्रतिश्रुतं कृतं श्लाघ्या दासतां त्यजपक्वणो ।।
हरिश्चंद्रस्येव नृणां नश्लाघ्या सत्यसंघता ।। ९

मित्रस्नेहस्य पर्यायस्तस्यैव साप्तपदं स्मृतम् ।।
स्नेहः स कीदृशो मित्रे[2] दुःखिते येन दृश्यते ।। १०

तदवश्यमहं साकमधुना[3] वह्निना साधनम् ।।
करिष्ये कीर्तिवधुषाः कृते सत्यमिदं सखे ।। ११

अनुजानी हि मामेतद्दर्शनं तव पश्चिमम् ।।
त्वया सह महाभाग नाडीजंघ द्विजोत्तम् ।। १२

नारद उवाच ।।[4]
वज्रवदुःसहां वाचं मार्कंडेयसमीरिताम् ।।
शुश्रुवान्स क्षणं ध्यात्वा प्रतीतः प्राहतावुभौ ।। १३

नाडीजंघ उवाच ।।
यद्येवं तदिदं मित्रं विशतं ज्वलनेऽधुना ।।
निवारय मुनिश्रेष्ठ मत्तोऽस्ति चिरजीवितः ।। १४

---

१ अ कलुषीणार्थिनना
२ ब मित्री
३ अ ममुना
४ ब श्री नारद उ ० ।।

प्राकारकर्णो नामासावुलूकः शिव पर्वते ।।
स ज्ञास्यति महीपालमिंद्रद्युम्नं न संशयः ।। १५

तस्मादहं त्वया सार्धममुना च शिवालयम् ।।
व्रजामि तं शिखरिणं मित्र कार्य प्रसिद्धये ।। १६

इत्येवमुक्ता ते जग्मुस्त्रयोऽपि द्विज पुंगवाः [1]।।
कैलासं[2] ददृशुस्तत्र तमुलूकं स्वनीडगम् ।। १७

कृत संविदसौ तेन बकः स्वागत पूजया ।।
पृष्टश्च तावुभौ प्राह तत्सर्वमभिवांछितम् ।। १८

चिरायुरसि जानीषे यदीन्द्रद्युम्नभूपतिम् ।।
तद्ब्रूहि तेन ज्ञानेन कार्यं जीवामहे वयम्[3]।। १९

इति पृष्टः सविमना मित्रकार्य प्रसाधनात् ।।
कौशिकः प्राह जानामि नेन्द्रद्युम्नमहं नृपम् ।। २०

अष्टाविंशत्प्रमाणा मे कल्पा जातस्य भूतले ।।
न दृष्टो न श्रुतो वासाविंद्रद्युम्नो नृपः क्षितौ ।। २१

---

१ अ पुंगवं
२ अ कैलाशं
३ अ वयः

तच्छ्रुत्वा विस्मतो भूपस्तस्यापुरतिमार्जितः ।।
दुःखितो पि तदा हेतुं पप्रच्छासौ तदायुषः[१] ।। २२

एवमायुर्यदि तव कथं प्राप्तं ब्रवीहि[२] तत ।।
उलूकत्वं कथमिदं जुगुप्सितमतीव च ।। २३

प्राकारकर्ण उवाच ।।
शृणु भद्र यथा दीर्घमायुर्मे शिवपूजनात् ।।
जुगुप्सितमुलूकत्वं शापेन च महामुनेः ।। २४

वसिष्ठ कुलसंभूतः पुराहमभवं द्विजः ।।
घंट इत्यभिविख्यातो वाराणस्यां शिवेरतः ।। २५

धर्मश्रवण निष्ठस्य साधूनां संसदि स्वयम् ।।
श्रुत्वास्मि पूजयामीशं बिल्वपत्रैरखंडितैः ।। २६

न मालती न मंदारः शतपत्रं[३] न मल्लिका ।।
तथा प्रियाणि श्रीवृक्षा यथा मदन विद्रुषः ।। २७

अखंड बिल्व पत्रेण एकेन शिवमूर्धनि ।।
निहितेन नरैः पुण्यं प्राप्य ते लक्षपुष्पजम् ।। २८

---

१ The fol%io No. 51 is missing from the MSS'A' (Slokas from 23 to 38 are missing)

२ अ। ब्रवीहि

३ ब शतपात्रै

अखंडितैर्बिल्व पत्रैः श्रद्धया स्वयमात्दतैः ।।
लिंगप्रपूजनं कृत्वा वर्षलक्षं वसेदिवि ।। २९

सच्छास्त्रेभ्य इतिश्रुत्वा[1]पूज्याम्य हमीश्वरम् ।।
त्रिकालं श्रद्धया पत्रैः श्री वृक्षस्य त्रिभिस्त्रिभिः ।। ३०

[2]ततो वर्षशतस्यांते तुतोषा शशिशेखरः[3] ।।
प्रत्यक्षीभूयमामाह मेघगंभीरया गिरा ।। ३१

ईश्वर उवाच ।।
तुष्टोस्मि तव विप्रेंद्राखंड बिल्वदलार्चनात् ।।
वृणीष्वाभिमतं यत्ते दास्याम्यपि च दुर्लभम् ।। ३२

अखंड बिल्वपत्रेण महातुष्टिः[4] प्रजायते ।।
एकेनापि यथान्येषां तथा न मम कोटिभिः ।। ३३

इत्युक्तोऽहं भगवता शंभुना स्वमनः स्थितम् ।।
वृणोमिस्म वरं देव कुरु मामजरामरम् ।। ३४

अथ लीलाविलासो मां तथेत्युकत्वाऽविचारितम् ।।
ययावदर्शनं प्रीतिमहं च महतीं गतः ।। ३५

---

१ ब पूजयामहमीश्वरं
२ ब ता सा
३ ब षिाखरः
४ ब यथा पृष्टिः

कृतकृत्यं तदात्मानमशासिषमहं क्षितौ ।।
एतस्मिन्नेव काले तु भृगुवंशयो[1]भवद्द्विजः ।। ३६

अवदात[2]त्रि जन्मासवक्षा चिच्छास्त्रार्थविद् ।।
सुदर्शनेति प्रथिता प्रिया तस्याभवत्सती ।। ३७

अतीव मुदिता पत्युर्मुखं प्रेक्ष्यास्य दर्शनात् ।।
तनया देवलस्यैषा रूपेणाप्रतिमा भुवि ।। ३८

तस्यां[3] तस्मादभूत्कन्या निर्विशेषा निजारणेः ।।
निवृत्त बालभावाभूत्कुमारी यौवनोन्मुखी ।। ३९

नालं बभूव तां दातुं तनयां गुणशालिनीम्[4] ।।
कस्यापि जनकः सा च वयः संधौ मयेक्षिता ।। ४०

प्रविशद्यौवनाभोग भावैर्रतिमनो हरा[5] ।।
निर्वास्या मानैरपरै स्तिलतं दुलिता कृतिः[6] ।। ४१

क्रीडमाना वयस्याभिर्लावण्य प्रतिमेव सा ।।
व्यचिंतयमहं विप्रतां निरिक्ष्य सुमध्यमाम् ।। ४२

---

| | | | | | |
|---|---|---|---|---|---|
| १ | ब | वंशो | २ | ब | अवजात |
| ३ | अ | प्रतौ नास्ति | ४ | ब | शालिनी |
| ५ | अ | हरं | ६ | अ. ब | कृतिं |

अनन्याऽऽकृतिमन्यो ऽसौ[1] विधिर्येनेति निर्मिता ।।
ततः सात्त्विक भावनां तत्क्षणादस्मि गोचरम् ।। ४३

प्रापिता लीलयाहत्य बाणैः कुसुमधन्विना ।।
ततो मया स्खलद्वाचं पृष्टा कस्येति तत्सखी ।। ४४

प्राहेति भृगुवंश्यस्य कन्येयं द्विजजन्मनः ।।
अनूढाद्यापि केनापि समायाताऽत्र खेलितुम् ।। ४५

ततः कुसुमबाणेन शरव्रातैर्भृशं हतः ।।
पितरं प्रणतो गत्वा[2] ययाचे तां भृगूद्वहम् ।। ४६

[3]स च मां सदृशं ज्ञात्वा शीलेन च कुलेन च ।।
अतीव चार्थिने[4] मह्यं ददौ वाचां पुरः क्रमात् ।। ४७

[5]ततः सा तनया तस्य भार्गवस्याश्रृणोदिति ।।
दत्तास्मि तस्मै[6] विप्राय विरूपायेति जल्पताम् ।। ४८

शेरूयमाणा जननीमाह पश्य यथा कृतम् ।।
अतीवानुचितं दत्त्वा जनकेन तथा वरे ।। ४९

---

१ ब विधेर्यैनिति निर्मिता ।।
२ ययाचे ...... हम् ।। इदमर्धं अ पुस्तके नष्टम् ।।
३ स च ...... ज्ञात्वा, इदमर्ध अ पुस्तके नष्टम् ।।
४ ब चार्थितं
५ ततः ...... तस्य इदमर्ध अ पुस्तके नष्टम् ।।
६ तस्मि

विषमालोड्य पास्यामि प्रवेक्ष्यामि हुताशनम् ।।
वरं न तु विरूपस्योद्वोढुर्भार्या कथंचन ।। ५०

ततः संबोध्य जननी तां सुतामह भार्गवम् ।।
न देयास्मै त्वया कन्या विरूपायेति चाग्रहात् ।। ५१

स वल्लभावचः श्रुत्वा धर्मशास्त्राण्यवेक्ष्य च ।।
दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत् ।। ५२

अर्वाकिशीला[1] क्रमणतो निष्ठा स्यात्सप्तमे पदे ।।
इति व्यवस्य प्रददावन्यस्मै तां द्विजः सुताम् ।। ५३

श्रुवोभाविनि विवाहे तु तच्च सर्वं मया श्रुतम् ।।
ततो तीव विलक्ष्योहं[2] वयस्यानां पुरस्तदा ।। ५४

नाशंक[3] वदनं भद्र तथा दर्शयितुं निजम् ।।
कामार्तोतीव तां सुप्तामवाग्निनिशि तदाहरम् ।। ५५

नीत्वा दुर्गतमेकांते [4]कार्ष्णमौद्वाहिकं विधिम् ।।
गांधर्वेण विवाहेन ततोकार्ष्णं यदीप्सितम् ।।

---

१ ब अर्वाक्शीला
२ ब विवक्ष्योहं
३ वदनं भद्र अ पुस्तके लुप्तम् ।
४ कार्ष्ण ....... विधिम् ।। इदमर्धं - अ पुस्तके नष्टम् ।

अनिच्छंती तदा बाला[१]बलात्सुरत सेवनम् ।।
अथानुपदमागत्य तत्पिताप्रातरेव माम् ।। ५७

निश्रवस्य[२] संवृतो विप्रैस्तां वीक्ष्योद्वाहितां सुताम् ।।
शशापकुपितो भद्र मां तदानीं स भार्गवः ।। ५८

भार्गव उवाच ।।
निशाचरस्य धर्मेण यत्त्वयोद्वाहिता सुता ।।
तस्मान्नि शाचरः पाप भव त्वमविलंबितम् ।। ५९

इति शप्तः प्रणम्यैनः पादोपग्रहपूर्वकम् ।।
हाहेति च ब्रुवन्गाढं साश्रुनेत्रं सगद्गदम् ।। ६०

ततोहम ब्रवं कस्मादऽदोषोऽपि मां भवानित[३] ।।
शापते भवता दत्ता मम वाचा पुरा[४] सुता ।। ६१

सोद्वाहिता मया कन्यादानं सकृदिति स्मृतिः ।।
स कृज्जलपंति राजानः सकृज्जल्पंति पण्डिताः[५] ।। ६२

सकृत्कन्याः प्रदीयंते त्रीण्येतानि सकृत्सकृत् ।।
किं च प्रतिश्रुतार्थस्य निर्वाहस्तत्सतां व्रतम् ।। ६३

---

१ बला..... नम् ।। अ प्रतौ श्लोकार्धं नास्ति ।
२ अ. ब निशम्यं
३ अ. ब भवानिति
४ अ. ब ? पुरः
५ ब ब्राह्मणाः (शब्द भिन्नत्वमस्ति)

[1]भवादृशानां साधूनां तस्य त्यागो विगर्हितः ।।
प्रतिश्रुता त्वया लब्धा तदा कालमियं मया ।। ६४

[2]उद्वोढा आधुना नाहमुचितः शापभाजनम् ।।
पृथा शपन्ति मद्वयं च भवंतस्तद्विचार्यताम् ।। ६५

यो दत्त्वा कन्यकां वाचा पुनश्चोद्धरति दुर्मतिः ।।
स याति नरकं चेति धर्मशास्त्रेषु निश्चितम् ।। ६६

तदाकर्ण्य व्यवस्थासौ तथ्यं मद्वचनं त्वदा ।।
पश्चात्तापसमोपेतो मुनिर्मामित्यथा ब्रवीत् ।। ६७

न मे स्यादन्यथा वाणी[3] उलूकस्त्वं भविष्यति ।।
निशाचरो ह्युलूकोऽपि प्रोच्यते द्विजसत्तम् ।। ६८

यदेंद्रद्युम्न विज्ञाने सहायस्त्वं भविष्यसि ।।
तदा त्वं प्रकृतिं विप्र प्राप्स्यसीत्य ब्रवीत्समाम् ।। ६९
[4]

तद्वाक्य समकालं च कौशिकत्वमिदं मम ।।
एतावंति दिनान्यासीं दष्टाविंशं दिनं विधेः ।। ७०

[5] इति श्री स्कांदे महापुराण एकाशीति साहस्त्र्यां संहितायां प्रथमे माहेश्वरखंडे कौमारिकाखंडे मही नदी प्रादुर्भावे बिल्वदल माहात्म्य वर्णनं नामाष्टमोऽध्यायः ।।

---

१ ब भावदशानां २ अ तद्वोढा ३ अ वाक्यं
४ अ ......मम् ।।
५ अ इति श्री स्कंदपुराणे महीप्रादुर्भावे बिल्वदल पूजाफलम् ।।
ब इति श्री स्कंदपुराणे कुमारिकाखंडे महीप्रादुर्भावे अष्टमोऽध्यायः ।।८।।